# श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायप्रयुक्तकतिपयसमस्तपदानां वर्गीकरणविश्लेषणे

हरिलालपौडेलः
उपप्राध्यापकः, व्याकरणविभागस्य
ने.सं.वि. विश्वविद्यालयविद्यापीठान्तर्गस्य, बेलझुण्डी-दाङ-नेपालस्थस्य
अणुसङ्केतः : hlpsharma2035@gmail.com

## शोधसारः

श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायस्य १–१२ श्लोकपर्यन्तं प्रयुक्तानां समस्तपदानां वर्गीकरणे विश्लेषणे च केन्द्रितोऽयं शोधलेखः। विशिष्टाद्वैतदर्शनप्रतिष्ठापकेन महावैयाकरणेन विशिष्टेन विदुषा श्रीरामानुजाचार्येण स्वविरचिते गीताभाष्ये गीतायाः श्रुतिस्मृतिसम्मतोऽर्थः प्रतिपादितः, किन्तु समासबाहुल्यात्तद्वाक्यार्थस्फोरणे पण्डितैरपि काठिन्यमनुभूयत इति समस्तपदानां विग्रहप्रदर्शनोद्देश्येनानुसन्धानमिदं विहितम् । मिश्रितस्वरूपकेऽस्मिन्ननुसन्धाने श्रीरामानुजाचार्यकृतगीताभाष्याद् द्वितीयाध्यायस्य १–१२श्लोकपर्यन्तं प्रयुक्तानां समस्तपदानां सङ्कलनं कृत्वा तेषां वर्गीकरणं विश्लेषणञ्च कृत्वा निष्कर्षः स्थापितोऽस्ति। अतोऽस्मिन् मूलतो विश्लेषणात्मकोऽध्ययनविधिरवलम्बितोऽस्ति । अत्र च मूलतः पाणिनीयव्याकरणस्य समाससम्बद्धः सिद्धान्तः सैद्धान्तिकपर्याधारत्वेन गृहीतोऽस्ति। प्राप्ततथ्यानां विश्लेषणेन चात्र– श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायस्य १–१२श्लोकपर्यन्तभागे शब्दद्वयादारभ्य त्रयोदशशब्दपर्यन्तानां शब्दानां समासः कृतः । तत्र च १२५ संख्यकानां समस्तपदानां प्रयोगः कृतोऽस्ति, येष्वत्र पदद्वयनिर्मितानि ५८ पदानि विहायान्येषां ६७ पदानामेव विश्लेषणं कृतम्। तेषु तत्पुरुषसमासः १२१ वारम्, बहुव्रीहिसमासः २७ वारम्, द्वन्द्वसमासः १८ वारम्, केवलसमासः ३ वारम्, अव्ययीभावसमा २ वारं प्रयुक्तः प्राप्तः, अत एव तत्पुरुषसमासस्यैवाधिकः प्रयोगः प्राप्यत इति निष्कर्षः स्थापितः। अत्र निर्धारितांशप्रयुक्तसमस्तपदानां ससूत्रनिर्देशं विग्रहः प्रदर्शितः, समासप्रकारश्चोल्लिखित इति लेखेनानेन रामानुजीयगीताभाष्यद्वितीयाध्यायायस्य १-१२ श्लोकभागस्यार्थबोधे सहयोगो भविष्यतीत्यपेक्ष्यते।

**शब्दकुञ्जी**– गीताभाष्यम्, समासः, विग्रहः, समस्तशब्दाः, तत्पुरुष इत्यादि।

## विषयपरिचयः

संस्कृतवाङ्मयेऽध्यात्मविषयकग्रन्थानां महत्त्वपूर्णं स्थानं विद्यते । तत्रापि व्यासरचितमहाभारतान्तर्गता श्रीमद्भगवद्गीता सर्वाधिकं प्रशस्यते । सर्वशास्त्राणां मूलबीजभूतो वेदः । वेदस्य सार उपनिषत्सु, तत्सारश्च गीतायां प्राप्यते (श्रीमद्भगवद्गीता, २०५४, पृ. ११)। अत एव सनातनवैदिकधर्मे गीताया महत्त्वपूर्णं स्थानमस्ति। उपनिषदां, ब्रह्मसूत्राणां गीतायाश्च संयुक्तं नाम प्रस्थानत्रयीति । दार्शनिकक्षेत्रे हि प्रमुखदार्शनिकाः प्रस्थानत्रय्यां भाष्यादिकं कृतवन्तः । तत्र विशिष्टाद्वैतदर्शनप्रतिष्ठापकेन श्रीरामानुजाचार्येणापि प्रस्थानत्रयीमध्ये उपनिषद्विषये वेदार्थसङ्ग्रहः, ब्रह्मसूत्रोपरि श्रीभाष्यम्, गीतोपरि च गीताभाष्यनामा ग्रन्थो रचितः। गीताप्रतिपाद्यार्थदृढीकरणाय, गूढार्थस्फोरणाय, गीतार्थविषयकभ्रमनिवारणाय च तेन गीताभाष्यं रचितम्। गीतायां ज्ञानकर्मयोगसहितशरणागतिरेव निष्कृष्यत इति गीताभाष्ये प्रतिपादितं दृश्यते। अध्यात्मादिविविधदृष्ट्याऽतिमहत्त्वपूर्णग्रन्थस्य गीताभाष्यस्याध्ययनमत्यावश्यकम्, किन्तु तत्र समस्तशब्दानां बाहुल्यमस्ति। तत्रापि कुत्रचित्तु दीर्घतरो जटिलसमासोऽपि कृतः, क्वचिच्च लघुसमासोऽपि

जटिलप्रकृतिको दृश्यत इति समासप्रक्रियामजानतां कृते भाष्यमिदं जटिलायते । अत एवैतद्भाष्याध्ययने जनैः कठिनताऽनुभूयते । अत एवास्य समासपरकमध्ययनमावश्यकमस्ति, किन्तु केनापि तत्कार्यं विहितं न दृश्यते ।

वन्दना दूबे (ई २००२) इत्यनयाऽनुसन्धात्र्या **श्रीमद्भगवद्गीता पर शङ्कर और रामानुज के भाष्यों का तुलनात्मक अध्ययन** इत्यस्मिन् शीर्षके विद्यावारिधिशोधप्रबन्धे श्रीशंकराचार्य–श्रीरामानुजौ श्रीमद्भगवद्गीतायाः प्रधानौ भाष्यकारौ, तयोश्च द्वयोरपि स्वमतप्रतिपादनशक्तिरनुपमा, द्वयोरपि मते भिन्ने, श्रीशंकरेण गीतायाभाष्ये द्वैतदर्शननं प्रतिपादितञ्चेत् श्रीरामानुजाचार्येण विविधैः प्रमाणैस्तत्र विशिष्टाद्वैतदर्शनं प्रतिपादितमिति तत्रोक्तम् । रामानुजमतानुसारेण च गीतोपदेशस्य प्रयोजनं परमपुरुषार्थमोक्षसाधनतया ज्ञानकर्मसाध्यस्य भक्तियोगस्य प्रतिपादनमस्तीति निष्कर्षः तत्र स्थापितः । मनीषा पाण्डेय (ई २००४–५) इत्यनयाऽनुसन्धात्र्या **आचार्य रामानुज की भक्ति अवधारणा** इत्यस्मिन् शोधप्रबन्धे श्रीरामानुजीयभक्तिदर्शनविवेचनक्रमे तदीयगीताभाष्यस्याप्युदरणानि प्रस्तुतानि । तत्रैव तया श्रीरामानुजाचार्यप्रतिपादितेन भक्तिदर्शनेन परवर्तिन आचार्या अपि प्रभाविताः, तदीयमतञ्च गृहीतवन्त इति चर्चितम्, श्रीरामानुजाचार्यप्रतिपादितभक्तिदर्शनेन समाजस्य महानुपकारो जात (पृ २१५–२२०) इति प्रतिपादितम् । श्रीमद्वेदान्तदेशिकेन (वै.२०३३) श्रीरामानुजाचार्यकृतगीताभाष्योपरि **तात्पर्यचन्द्रिका** नाम्नी व्याख्या रचिता , यत्र केषाञ्चिच्छब्दानां व्युत्पत्तिप्रदर्शनक्रमे केषाञ्चिदेव समस्तशब्दानां विग्रहः कृतः, किन्तु यत्र वस्तुतो विग्रहस्यावश्यकतानुभूयते, तत्र तथा न कृतः । तत्र प्रत्येकं शब्दानां विग्रहादिकं प्रदत्तं न दृश्यते । कुत्रचित् केषाञ्चित् शब्दानां विग्रहादिके विहिते सत्यपि यथापेक्षं यथावश्यकञ्च कार्यं विहितं न दृश्यते । अतोऽनया व्याख्यया श्रीरामानुजाचार्यकृतगीताभाष्यप्रयुक्तसमस्तशब्दविषयिणी जिज्ञासा नैव पूर्यते । हरिलालपौडेलेन (वै.२०७८) **श्रीरामानुजीयगीताभाष्यप्रथमाध्यायस्थकतिपयजटिलसमस्त- शब्दानामध्ययनम्** इत्यस्मिन् शोधलेखे श्रीरामानुजाचार्यकृतगीताभाष्यप्रथमाध्यायस्थानां जटिलप्रकृतिकानां दशसमस्तपदानां विश्लेषणं विग्रहप्रदर्शनञ्च कृतम् । तच्च कार्यं प्रथमाध्यायस्य दशशब्देष्वेव सीमितमिति तेन चर्चितैरन्यैः पूर्वकार्यैश्चास्याध्ययनस्योद्देश्यं न पूर्यते । अत एवात्र लेखे श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायस्य १–१२ श्लोकपर्यन्तं प्रयुक्तानां समस्तपदानां वर्गीकरणं विश्लेषणञ्च क्रियते ।

अत्र च विशेषतः- श्रीरामानुजविरचिते गीताभाष्यद्वितीयाध्यायस्य निर्दिष्टांशे शब्दसंख्यादृष्ट्या समासनामदृष्ट्या च कतिप्रकारकाणि समस्तपदानि प्रयुक्तानि सन्ति ? तत्र प्रयुक्तानां समस्तशब्दानां वर्गीकरणं कथं कर्तुं शक्यते ? तेषां विग्रहः कथं कर्तुं शक्यते ? इत्यादिकानां शोधप्रश्नानामुत्तरान्वेषणं कृतम् । गीताद्वितीयाध्यायस्य १–१२श्लोकपर्यन्तभाष्यप्रयुक्तानां समस्तशब्दानां शब्दसंख्यादृष्ट्या समासनामदृष्ट्या च वर्गीकरणं, पाणिनीयव्याकरणसम्मतविग्रहप्रदर्शनञ्चास्यानुसन्धानात्मकलेखस्योद्देश्यम् ।

## अनुसन्धानविधिः

अनुसन्धानमिदं मूलत निगमनात्मकविधिं विश्लेषणात्मकविधिञ्चाधृत्य कृतम् । अस्मिन्ननुसन्धानेऽवलम्बितोऽध्ययनविधिर्यथा–

अनुसन्धानप्रकारः

अत्रानुसन्धाने हि श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायस्य १–१२ श्लोकपर्यन्तभागस्थसमस्त-

शब्दानां विश्लेषणं कृत्वा शब्दात्मकः सङ्ख्यात्मकश्च निष्कर्षः स्थापितोऽस्ति । अत एवात्र गुणात्मकस्य परिमाणात्मकस्य चानुसन्धानस्य लक्षणं घटत इति मिश्रितप्रकारकमनुसन्धानमस्तीदम् ।

**अनुसन्धानस्य क्षेत्रं परिसीमा च**

श्रीरामानुजाचार्यकृतगीताभाष्यस्थसमस्तशब्दा अस्यानुसन्धानस्य विषयक्षेत्रम् । तत्र च प्रायः सर्वत्र समासबहुला भाषास्ति । अत एवैकस्मिँल्लेखे तत्रत्यानां सर्वेषां समस्तशब्दानामध्ययनमसम्भवम् । अत एव तत्कृतगीताभाष्यद्वितीयाध्याय एवेदमध्ययनं सीमितम् । तत्रापि १–१२ श्लोकपर्यन्तभागस्थानां द्व्यधिकपदनिर्मितानां समस्तशब्दानामेवाध्ययनमत्र क्रियते, तदतिरिक्ताध्ययनं न क्रियते । एषाऽस्यानुसन्धानस्य परिसीमा ।

**तथ्याङ्कसङ्कलनं तत्साधनानि च**

अत्र श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायस्य १–१२ श्लोकपर्यन्तभागात् समस्तशब्दरूपतथ्यानां सङ्कलनं कृतम् । अष्टाध्याय्यादिपाणिनीयव्याकरणशास्त्रीयमूलग्रन्थेभ्यश्च समाससिद्धान्तसम्बद्धतथ्यानां सङकलनं कृतमिति प्रायः प्राथमिकस्रोतस एव तथ्याङ्कसङ्कलनसाधनानि सन्ति, शास्त्रीयविषयेषु मूलग्रन्थानां प्राथमिकस्रोतोरूपेण परिभाषणात् । क्वचिद्द्वितीयकस्रोतोभ्योऽपि तथ्यसङ्कलनं कृतम् ।

**तथ्याङ्कविश्लेषणप्रक्रिया**

अत्रानुसन्धानक्रमे सर्वप्रथमं श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायस्य १–१२ श्लोकपर्यन्तभागस्थसमस्तशब्दानां चयनं कृतम् । अत्र प्रसङ्गे च शब्दत्रयनिर्मितादारभ्य त्रयोदशशब्दनिर्मितानां समस्तपदानां वर्गीकरणं, पृथक् पृथक् सारिणीविन्यासञ्च कृत्वा तत्र सारिणीषु समस्तशब्दानां विग्रहाः, समासविधायकसूत्रवार्तिकानि, समासनामानि च प्रदर्शितानि । तत्क्रमे च सैद्धान्तिकपर्याधारभूत-पाणिनीयव्याकरणस्य पर्याप्तः सहयोगो गृहीतः । सारिणीविन्यासानन्तरञ्च सारिणीषु दृष्टानां तथ्यानां विश्लेषणं विहितम् । अन्ते च स्वकृत-वर्गीकरण-तालिकीकरण-विश्लेषणानां परीक्षणं सत्यापनञ्च कृत्वा निष्कर्षः स्थापितः ।

**सैद्धान्तिकपर्याधारः**

अत्र लेखे पाणिनीयव्याकरणानुसारेण श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायस्थानां समस्तशब्दानामध्ययनं कृतम् । अत एवात्र पाणिनीयव्याकरणमेव मूलभूतं सैद्धान्तिकमाधारः । तत्र च पाणिनीयाष्टाध्यायी, वैयाकरणसिद्धान्तकौमुदी, तदीया व्याख्याग्रन्थाः, गीताभाष्यम्, तदुपरि रचिता व्याख्याग्रन्थाः, कोशादिग्रन्थाश्चास्यानुसन्धानस्य सैद्धान्तिकाधारत्वेन स्वीकृताः । पाणिनीयव्याकरणे समाससम्बन्धिनी यादृशी व्यवस्थास्ति, सैवास्यानुसन्धानस्य सैद्धान्तिकपर्याधारः । पाणिनिः (२०४७) स्वकीये 'अष्टाध्यायी'नाम्नि ग्रन्थे 'प्राक्कडारात् समासः' (२।१।३) इत्यत आरभ्य 'कडारा कर्मधारये' (२।२।२८) इति सूत्रपर्यन्तमष्टोत्तरशतसूत्रैः समासप्रक्रियायाः वैज्ञानिकीं व्यवस्थां कृतवानस्ति । एकाधिकसमर्थपदानां पदयोर्वा सार्थकरूपेण मेलनं कृत्वा विशिष्टैकपदीकरणं समासः (पौडेलः, २०७४, पृ. १९०) । वैयाकरणैः समासे भिन्ना विशिष्टा वा शक्तिः स्वीक्रियते (भट्टः, १९९९, पृ. २३०) । समासश्चाव्ययीभाव-तत्पुरुष-बहुव्रीहि-द्वन्द्वभेदेन चतुर्धा (पतञ्जलिः, २०२०, पृ. ५७०) , तत्र विशेषसंज्ञाविनिर्मुक्तं केवलसमासमपि संयोज्य पञ्चधा (आचार्यः, २०४७, पृ.औ ४७८) च मन्यते । अयमेवास्यानुसन्धानात्मकलेखस्य विषयगतसैद्धान्तिकपर्याधारः ।

अनुसन्धानात्मकलेखस्वरूपनिर्माणक्रमे आधारसन्दर्भप्रदर्शनाय गद्यात्मककृतीनां कृते यथासम्भवं लेखकमितिपृष्ठपद्धतेः (एपीएपद्धतेः) प्रयोगः कृतः, सूत्रश्लोकादिसन्दर्भप्रदर्शनाय संस्कृतवाङ्मयान्तर्गते व्याकरणशास्त्रे मौलिकपद्धतिरूपेण बहुप्रचलिताया अध्यायपादसूत्रसंख्यादिपद्धतेः प्रयोगः कृतः ।

## विषयगतविश्लेषणम्

लेखेऽस्मिन् यथाशीर्षकं विभिन्नेषूपशीर्षकेषु विषयगतविश्लेषणं क्रियते । तदर्थञ्च श्रीरामानुजाचार्य-तत्कृगीताभाष्ययोश्चर्चां कृत्वा तत्कृतगीताभाष्यद्वितीयाध्यायप्रयुक्तसमस्तपदानां वर्गीकरणं विश्लेषणञ्च निम्नलिखितरूपेण विधीयेते :

### श्रीरामानुजाचार्यस्तत्कृतगीताभाष्यञ्च

श्रीरामानुजाचार्यो हि १०७४ तमवैक्रमाब्दे दक्षिणभारतस्य तोण्डीरमण्डलान्तर्गते श्रीमहाभूतपुरीनामके दिव्यक्षेत्रे केशवकान्तिमत्योः पुत्रत्वेनावतीर्णोऽद्वितीयो विद्वानासीत् (नेपालोऽन्ये च, २०७४, पृ. १३–१९) । तद्रचितेषु नवसु ग्रन्थरेषु गीताभाष्यमप्येकम् । तत्र तेन गीताया वेदोपनिषादिशास्त्रसम्मतोऽर्थः प्रकाशितः । रामानुजोत्तरकाल–वर्तिभिराचार्यैस्तदीयगीताभाष्यमेवानुसृतं दृश्यते (गोयन्का, २०५०,पृ. ३) । एतेन श्रीरामानुजाचार्यकृतगीताभाष्यस्य महत्त्वं नितरां सिद्ध्यति। तत्रत्या भाषा समासबहुलास्ति। अतस्तदीयपंक्तिस्फोरणे समासप्रक्रियाज्ञानमावश्यकं दृश्यते।

### श्रीरामानुजाचार्यकृतगीताभाष्यद्वितीयाध्यायप्रयुक्तसमस्तपदानां वर्गीकरणं विश्लेषणञ्च

श्रीरामानुजीयगीताभाष्ये समासबहुला भाषास्ति । द्वितीयाध्यायेऽपि सप्तशतकल्पाः (६८५ सङ्ख्यकाः) समस्तशब्दाः प्राप्यन्ते । तेषां सर्वेषामध्ययनमस्मिन् लघुलेखे न सम्भवतीति १–१२श्लोकपर्यन्तभागस्थानां द्व्यधिकपदनिर्मितानां समस्तशब्दानामेव वर्गीकरणं विश्लेषणञ्च क्रियते। तथ्यानां प्रस्तुतिर्व्यवस्थिता तद्बोधश्च सरलतया शीघ्रमेव स्यादिति धियाऽत्र प्राप्ततथ्यानि सारणीषूपन्यस्यन्ते।

सारणी -१ : शब्दत्रयनिर्मितसमस्तपदानि

| क्र. सं. | समस्तपदानि | विग्रहाः | समासविधायक सूत्राणि | समास–नामानि |
|---|---|---|---|---|
| १ | अविद्वत्सेवितम् (पृ.२४) | न विद्वांसः अविद्वांसः, अविद्वद्भिः सेवितम् | नञ् २।२।६, कर्तृकरणे कृता बहुलम् २।१।३२ | नञ्समासः, तृतीयातत्पुरुषः |
| २ | परलोकविरोधिनम् (पृ.२४) | परश्चासौ लोकः परलोकः, तस्य विरोधी, तम् | विशेषणं विशेष्येण० २।१।५७, षष्ठी २।२।८ | कर्मधारयतत्पुरुषः, षष्ठीतत्पुरुषः |

| | | | | |
|---|---|---|---|---|
| ३ | अकीर्तिकरम् (पृ.२४) | न कीर्तिः अकीर्तिः, तां करोतीति अकीर्तिकरः, तम् | नञ् २।२।६, उपपदमतिङ् २।२।१९ | नञ्समासः, उपपदतत्पुरुषः |
| ४ | हृदयदौर्बल्यकृतम् (पृ.२४) | हृदयस्य दौर्बल्यम् = हृदयदौर्बल्यम्, तेन कृतम् | षष्ठी २।२।८, कर्तृकरणे कृता बहुलम् २।१।३२ | षष्ठीतत्पुरुषः, तृतीयातत्पुरुषः |
| ५ | भीष्मद्रोणादिकान् (पृ.२५) | भीष्मश्च द्रोणश्च= भीष्मद्रोणौ, तौ आदौ येषां तान् | चार्थे द्वन्द्वः २।२।२९, अनेकमन्यपदार्थे २।२।२४ | द्वन्द्वः, बहुब्रीहिः |
| ६ | अतिमात्रप्रसक्तान् (पृ.२५) | अति एव = अतिमात्रम् , अतिमात्रं प्रसक्ताः= अतिमात्रप्रसक्ताः, तान् | मयूरव्यंसकादयश्च २।१।७२ (२) | कर्मधारयतत्पुरुषः (२) |
| ७ | अतिमात्रकृपणः (पृ.२७) | अति एव = अतिमात्रम् , अतिमात्रं कृपणः | मयूरव्यंसकादयश्च २।१।७२ (२) | कर्मधारयतत्पुरुषः (२) |
| ८ | भगवत्पादाम्बुजम् (पृ.२७) | पादौ अम्बुजम् इव= पादाम्बुजम्, भगवतः पादाम्बुजम् | उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २।१।५६, षष्ठी २।२।८ | कर्मधारयः, षष्ठीतत्पुरुषः |
| ९ | समुपस्थितस्नेह-कारुण्याभ्याम् (पृ.२७) | स्नेहश्च कारुण्यञ्च= स्नेहकारुण्ये, समुपस्थिते च ते स्नेहकारुण्ये, ताभ्याम् | चार्थे द्वन्द्वः २।२।२९, विशेषणं विशेष्येण० २।१।५७ | द्वन्द्वः, कर्मधारयः |
| १० | आत्मयाथात्म्यज्ञानेन (पृ.२८) | आत्मनो याथात्म्यम्= आत्मयाथात्म्यम् , तस्य ज्ञानेन | षष्ठी २।२।८ (२) | षष्ठीतत्पुरुषः (२) |

| | | | | |
|---|---|---|---|---|
| ११ | फलाभिसन्धिरहितस्य (पृ.२८) | फलस्याभसिन्धिः = फलाभसिन्धिः, तेन रहितस्य | षष्ठी २। २। ८, तृतीया २।१।३० (यो.वि.) | ष्रष्ठीतत्पुरुषः , तृतीयातत्पुरुषः |
| १२ | विरुद्धगुणान्वितम् (पृ.२८) | विरुद्धाश्च ते गुणाः = विरुद्धगुणाः, तैरन्वितः, तम् | विशेषणं विशेष्येण० २।१।५७, तृतीया २।१।३० (यो.वि.) | कर्मधारयतत्पुरुषः, तृतीयातत्पुरुषः |
| १३ | अगतासून् (पृ.२९) | न गताः = अगताः , अगताः असवः (प्राणाः) येषां तान् | नञ् २। २। ६, अनेकमन्यपदार्थे २।२।२४ | नञसमासः, बहुव्रीहिः |
| १४ | स्वभावयाथात्म्यविदः (पृ.२९) | स्वभावस्य याथात्यम् =स्वभावयाथात्यम्, तद्विदन्तीति | षष्ठी २।२।८, उपपदमतिङ् | षष्ठीतत्पुरुषः, उपपदतत्पुरुषः |
| १५ | धर्माधर्मभाषणम् (पृ.३०) | धर्मश्चाधर्मश्च= धर्माधर्मौ , तयोर्भाषणम् | चार्थे द्वन्द्वः २। २। २९, षष्ठी २।२।८ | द्वन्द्वः, षष्ठीतत्पुरुषः |
| १६ | मरणाधीनविनाशः (पृ.३०) | मरणस्याधीनः= मरणाधीनः, मरणाधीनो विनाशो यस्य सः | षष्ठी २। २। ८, अनेकमन्यपदार्थे २।२।२४ | षष्ठीतत्पुरुषः, बहुव्रीहिः |
| १७ | उत्पत्तिविनाशयोगः (पृ.३०) | उत्पत्तिश्च विनाशश्च= उत्पत्तिविनाशौ, तयोर्योगः | चार्थे द्वन्द्वः २। २। २९, षष्ठी २।२।८ | द्वन्द्वः, षष्ठीतत्पुरुषः |
| १८ | अज्ञानमोहितम् (पृ.३१) | न ज्ञानम् = अज्ञानम्, तेन मोहितः, तम् | नञ् २। २। ६, तृतीया तत्कृतार्थेन० २।१।३० | नञ्तत्पुरुषः, तृतीयातत्पुरुषः |
| १९ | तत्त्वोपदेशसमये (पृ.३२) | तत्त्वस्योपदेशः= तत्त्वोपदेशः, तस्य समयः = तत्त्वोपदेशसमयः, तस्मिन् | षष्ठी २।२।८ (२) | षष्ठीतत्पुरुषः (२) |

| | | | | |
|---|---|---|---|---|
| २० | परमार्थदृष्टेः (पृ.३२) | परमश्चासौ अर्थः = परमार्थः, तस्मिन् दृष्टिर्यस्य सः= परमार्थदृष्टिः, तस्य | विशेषणं विशेष्येण० २।१।५७, अनेकमन्यपदार्थे २।२।२४ | कर्मधारयः, बहुव्रीहिः |
| २१ | अधिगताद्वैतज्ञानस्य (पृ.३२) | अद्वैतस्य ज्ञानम्= अद्वैतज्ञानम्, अधिगतम् अद्वैतज्ञानं येन सः, तस्य | षष्ठी २।२।८, अनेकमन्यपदार्थे २।२।२४ | षष्ठीतत्पुरुषः, बहुव्रीहिः |
| २२ | बाधितानुवृत्तिरूपम् (पृ.३२) | बाधितस्य अनुवृत्तिः (स्वीकृतिः)= बाधितानुवृत्तिः, बाधितानुवृत्तिः रूपं यस्य सः= बाधितानुवृत्तिरूपः, तम् | षष्ठी २।२।८, अनेकमन्यपदार्थे २।२।२४ | षष्ठीतत्पुरुषः, बहुव्रीहिः |
| २३ | ज्ञानबलक्रिया (पृ.३३) | ज्ञानञ्च बलञ्च= ज्ञानबले, ज्ञानबले क्रिया च सन्ति यस्यां सा (भगवच्छक्तिः) | चार्थे द्वन्द्वः २।२।२९, अनेकमन्यपदार्थे २।२।२४ | द्वन्द्वः, बहुव्रीहिः |
| २४ | श्रुतिस्मृतिविरोधात् (पृ.३३) | श्रुतिश्च स्मृतिश्च= श्रुतिस्मृती, तयोर्विरोधः, तस्मात् | चार्थे द्वन्द्वः २।२।२९ अनेकमन्यपदार्थे २।२।२४ | द्वन्द्वः, बहुव्रीहिः |
| २५ | स्वात्मप्रतिबिम्बेषु (पृ.३४) | स्वश्चासौ आत्मा= स्वात्मा (स्वकीयशरीरम्), तस्य प्रतिबिम्बाः= स्वात्मप्रतिबिम्बाः, तेषु | विशेषणं विशेष्येण० २।१।५७, षष्ठी २।२।८ | कर्मधारयः, षष्ठीतत्पुरुषः |

| | | | | |
|---|---|---|---|---|
| २६ | चन्द्रैकत्वज्ञानेन (पृ.३४) | चन्द्रस्य एकत्वम्: चन्द्रैकत्वम्, तस्य ज्ञानम् =चन्द्रैकत्वज्ञानम्, तेन | षष्ठी २।२।८ (२) | षष्ठीतत्पुरुषः (२) |
| २७ | अकिञ्चित्करम् (पृ.३४) | किञ्चित् करोतीति किञ्चित्करः, न किञ्चित्करः= अकिञ्चित्करः , तस्य नपुंस्त्वे रूपम् | उपपदमतिङ् २।२।१९, नञ् २।२।६, | उपपदतत्पुरुषः, नञ्तत्पुरुषः |
| २८ | शिष्यतज्ज्ञानयोः (पृ.३५) | तस्य ज्ञानम्= तज्ज्ञानम् , शिष्यश्च तज्ज्ञानञ्च =शिष्यतज्ज्ञाने, तयोः | षष्ठी २।२।८, चार्थे द्वन्द्वः २।२।२९ | षष्ठीतत्पुरुषः, द्वन्द्वः |
| २९ | असमीचीनवादैः (पृ.३६) | न समीचीनाः= असमीचीनाः , असमीचीनाश्च ते वादाः= असमीचीनवादाः, तैः | नञ् २।२।६, विशेषणं विशेष्येण० २।१।५७ | नञ्तत्पुरुषः, कर्मधारयः |

श्रीरामानुजाचार्यकृतगीताभाष्यस्य विश्लेष्यांशे शब्दत्रयनिर्मितसमस्तपदानि २९ सङ्ख्यकानि प्राप्तानि। तत्र २ पदयोस्तृतीयातत्पुरुषः, १५ पदेषु षष्ठीतत्पुरुषः, २ पदयोः नञ्तत्पुरुषः, ३ पदेषु उपपदतत्पुरुषसमासः, ४ पदेषु कर्मधारयतत्पुरुषसमासः इति कृत्वा सङ्कलनया २६ वारं तत्पुरुषसमासः प्रयुक्तो दृश्यते। एवमेव ८ पदेषु बहुव्रीहिसमासः,७पदेषु द्वन्द्वसमासः प्रयुक्तोदृश्यते।इत्थञ्चगीताभाष्यस्यसमीक्ष्यखण्डेशब्दत्रयनिर्मितसमस्तपदेष्वपि तत्पुरुषसमासस्याधिकः प्रयोगो दृष्टिपथमागतः।

सारणी -२ : शब्दचतुष्टयनिर्मितसमस्तपदानि

| क्र. सं. | समस्तपदानि | विग्रहाः | समासविधायक सूत्राणि | समास-नामानि |
|---|---|---|---|---|
| १ | तद्वधलब्धविजयात् (पृ.२७) | तेषां वधः = तद्वधः, तद्वधेन लब्धः = तद्वधलब्ध :, स चासौ विजयः= तद्वधलब्धविजय :, तस्मात् | षष्ठी २।२।८, तृतीया तत्कृतार्थेन २।१।३०, विशेषणं विशेष्येण० २।१।५७ | षष्ठीतत्पुरुषः, तृतीयातत्पुरुषः, कर्मधारयतत्पुरुषः |
| २ | देहात्मस्वभाव-ज्ञानवताम् (पृ.२९) | देहात्मनोः स्वभावः = देहात्मस्वभाव :, तस्य ज्ञानम् = देहात्मस्वभावज्ञानम्, तद्वताम् | षष्ठी २।२।८ (२) | षष्ठीतत्पुरुषः (२) |
| ३ | तत्प्राप्त्युपायभूतम् (पृ.३०) | तस्य प्राप्तिः= तत्प्राप्तिः, तत्प्राप्तेरुपायः= तत्प्राप्त्युपायः , तत्प्राप्त्युपायोऽभवद् इति= तत्प्राप्त्युपायभूतः, तम् | ” ” (२) , सह सुपा | षष्ठीतत्पुरुषः (२), केवलः |
| ४ | पारमार्थिकनित्य-त्वोपदेशसमये (पृ.३१) | पारमार्थिकञ्च तत् नित्यत्वम् = पारमार्थिकनित्यत्वम्, तस्योपदेशः, पारमार्थिकनित्यत्वपदेशः, तस्य समये | विशेषणं विशेष्येण०२। १। ५७, षष्ठी २।२।८ (२) | कर्मधारयः, षष्ठीतत्पुरुषः (२) |

| | | | | |
|---|---|---|---|---|
| ५ | औपाधिकात्म-भेदवादे (पृ.३२) | आत्मनो भेदः = आत्मभेदः, औपाधिकश्चासौ आत्मभेदः= औपाधिकात्मभेदः, तं वदतीति औपाधिकात्मभेदवादः, तस्मिन् | षष्ठी २।२।८ विशेषणं विशेष्येण० २।१।५७ उपपदमतिङ् २।२।१९ | षष्ठीतत्पुरुषः कर्मधारयः, उपपदतत्पुरुषः |
| ६ | भगवदुक्तात्मभेदः (पृ.३२) | भगवतोक्तः = भगवदुक्त :, आत्मनो भेदः = आत्मभेदः, भगवदुक्तश्चासौ आत्मभेदः = भगवदुक्तात्मभेदः | कर्तृकरणे कृता बहुलम् २।१।३२ षष्ठी २।२।८, विशेषणं विशेष्येण० २।१।५७ | तृतीयातत्पुरुषः, षष्ठीतत्पुरुषः, कर्मधारयः |
| ७ | मरीचिकाजल-ज्ञानादिकम् (पृ.३२-३३) | जलस्य ज्ञानं = जलज्ञानम्, मरीचिकासु जलज्ञानम् = मरीचिकाजलज्ञानम् , तत् आदौ यस्य तत् = मरीचिकाजलज्ञानादि, तदेव | षष्ठी २।२।८, सप्तमी २।१।४० (यो. वि.), अनेकमन्यपदार्थे २।२।२४ | षष्ठीतत्पुरुषः, सप्तमीतत्पुरुषः, बहुव्रीहिः |
| ८ | मिथ्यार्थविषयत्व-निश्चयात् (पृ.३३) | मिथ्या चासौ अर्थः= मिथ्यार्थ :, स विषयो यस्य तत्= मिथ्यार्थविषयं ज्ञानम्, तस्य भावः मिथ्यार्थविषयत्वम् , तस्य निश्चय= : मिथ्यार्थविषयत्वनिश्चयः, तस्मात् | विशेषणं विशेष्येण० २।१।५७, अनेकमन्यपदार्थे २।२।२४, षष्ठी २।२।८ | कर्मधारयः , बहुव्रीहिः, षष्ठीतत्पुरुषः |
| ९ | उपदेशादि-प्रवृत्तिहेतुः (पृ.३३) | उपदेश आदौ येषां ते= उपदेशादयः,तेषु प्रवृत्तिः, उपदेशादिप्रवृत्ति :, तस्य हेतुः | अनेकमन्यपदार्थे २।२।२४, सप्तमी २।१।४० ( यो.वि.) , षष्ठी २।२।८ | बहुव्रीहिः, सप्तमीतत्पुरुषः, षष्ठीतत्पुरुषः |

| | | | | |
|---|---|---|---|---|
| १० | शास्त्राधिगततत्त्व-ज्ञानतया (पृ.३३) | तत्त्वस्य ज्ञानम् = तत्त्वज्ञानम्, शास्त्राद् अधिगतं तत्त्वज्ञानं येन सः= शास्त्राधिगततत्त्वज्ञानः, तस्य भावः= शास्त्राधिगततत्त्वज्ञानता, तया | षष्ठी २।२।८ , अनेकमन्यपदार्थे २।२।२४ | षष्ठीतत्पुरुषः, बहुव्रीहिः |
| ११ | स्वनिश्चयानुरूपम् (पृ.३४) | स्वस्य निश्चयः = स्वनिश्चयः, रूपस्य योग्यम्= अनुरूपम्, स्वनिश्चयस्य अनुरूपम् | षष्ठी २।२।८, अव्ययं विभक्ति० २।१।६ षष्ठी २।२।८ | षष्ठीतत्पुरुषः, अव्ययीभावः, षष्ठीतत्पुरुषः |
| १२ | मणिकृपाण-दर्पणादिषु (पृ.३४) | मणिश्च कृपाणश्च दर्पणश्च= मणिकृपाणदर्पणाः, ते आदौ येषां ते = मणिकृपाणदर्पणादयः, तेषु | चार्थे द्वन्द्वः २।२।२९ अनेकमन्यपदार्थे २।२।२४ | द्वन्द्वः, बहुव्रीहिः |
| १३ | अद्वितीयात्म-ज्ञानेन (पृ.३४) | न द्वितीयः = अद्वितीयः, स चासौ आत्मा = अद्वितीयात्मा, तस्य ज्ञानम् = अद्वितीयात्मज्ञानम्, तेन | नञ् २।२।६, विशेषणं विशेष्येण० २।१।५७, षष्ठी २।२।८ | नञ्तत्पुरुषः, कर्मधारयः, षष्ठीतत्पुरुषः |
| १४ | द्विचन्द्रज्ञानादौ (पृ.३४) | द्वयोश्चन्द्रयोः समाहारः= द्विचन्द्रम् , तस्य ज्ञानम्= द्विचन्द्रज्ञानम् , तद् आदौ यस्य तत्= द्विचन्द्रज्ञानादि , तस्मिन् | चार्थे द्वन्द्वः २।२।२९ षष्ठी २।२।८, अनेकमन्यपदार्थे २।२।२४ | द्वन्द्वः, षष्ठीतत्पुरुषः, बहुव्रीहिः |

| | | | | |
|---|---|---|---|---|
| १५ | पारमार्थिक-तिमिरादिदोषस्य (पृ.३४) | तिमिर आदौ यस्य सः= तिमिरादि , स चासौ दोषः =तिमिरादिदोषः, पारमार्थिकश्चासौ तिमिरादिदोषः= पारमार्थिकतिमिरादिदोषः, तस्य | अनेकमन्यपदार्थे २।२।२४, विशेषणं विशेष्येण० २।१।५७ (२) | बहुव्रीहिः, कर्मधारयः (२) |
| १६ | द्विचन्द्रज्ञानहेतोः (पृ.३४) | द्वयोश्चन्द्रयोः समाहारः= द्विचन्द्रम् , तस्य ज्ञानम्= द्विचन्द्रज्ञानम् , तस्य हेतुः, तस्य | चार्थे द्वन्द्वः २।२।२९ षष्ठी २।२।८ | द्वन्द्वः, षष्ठीतत्पुरुषः (२) |
| १७ | प्रबलप्रमाण-बाधितत्वेन (पृ.३४) | प्रकृष्टं बलं यस्य तत्= प्रबलम् , प्रबलञ्चेदं प्रमाणम्= प्रबलप्रमाणम्, तेन बाधितम्= प्रबलप्रमाणबाधितम् , तत्त्वेन | प्रादिभ्यो धातुजस्य० (वा), विशेषणं विशेष्ये० २।१।५७, तृतीया तत्कृतार्थेन ०२।१।३० | प्रादिबहुव्रीहिः, कर्मधारयः, तृतीयातत्पुरुषः |
| १८ | वस्तुयाथात्म्य-ज्ञानविनष्टत्वात् (पृ.३५) | वस्तुनो याथात्म्यम्= वस्तुयाथात्म्यम् , तस्य ज्ञानम्= वस्तुयाथात्म्यज्ञानम् , वस्तुयाथात्म्यज्ञानेन विनष्टः, तत्त्वात् | षष्ठी २।२।८<br><br>तृतीया तत्कृतार्थेन०२।१।३० | षष्ठीतत्पुरुषः (२)<br><br>तृतीयातत्पुरुषः |
| १९ | अद्वितीयात्म-विज्ञानात् | न द्वितीयः= अद्वितीयः, अद्वितीयश्चासौ आत्मा= अद्वितीयात्मा, तस्य विज्ञानम्= अद्वितीयात्मविज्ञानम्, तस्मात् | नञ् २।२।६, विशेषणं विशेष्येण० २।१।५७, षष्ठी २।२।८ | नञ्तत्पुरुषः, कर्मधारयः, षष्ठीतत्पुरुषः |

इत्थञ्च श्रीरामानुजाचार्यकृतगीताभाष्यस्य विश्लेष्यांशे शब्दचतुष्टयनिर्मितसमस्तपदानि १९ सङ्ख्यकानि

प्राप्तानि। तत्र १ पदे केवलः, १ पदेऽव्ययीभावः, १ पदे तृतीयातत्पुरुषः, १७ पदेषु षष्ठीतत्पुरुषः, १ पदे सप्तमीतत्पुरुषः, २ पदयोः नञ्तत्पुरुषः, १ पदे उपपदतत्पुरुषः, ९ पदेषु कर्मधारयतत्पुरुषः इति कृत्वा सङ्कलनया ३१ स्थानेषु तत्पुरुषसमासः प्रयुक्तो दृश्यते। ८ पदेषु बहुव्रीहिः, ३ पदेषु द्वन्द्वसमासः प्रयुक्तो दृश्यते । इत्थञ्च गीताभाष्यस्य समीक्ष्यखण्डे शब्दचतुष्टयनिर्मितसमस्तपदेष्वपि तत्पुरुषसमासस्याधिकः प्रयोगो दृष्टिपथमागतः ।

सारणी – ३ : शब्दपञ्चकनिर्मितसमस्तपदानि

| **क्र. सं.** | **समस्तपदानि** | **विग्रहाः** | **समासविधायक सूत्राणि** | **समास-नामानि** |
|---|---|---|---|---|
| १ | आत्मयाथार्थ्य-प्राप्त्युपायताज्ञानेन (पृ.२८) | आत्मनो याथार्थ्यम्= आत्मयाथार्थ्यम्, तस्य प्राप्तिः = आत्मयाथार्थ्यप्राप्तिः, तस्या उपायः = आत्मयाथार्थ्य प्राप्त्युपाय :तस्य भावः= आत्मयाथार्थ्यप्राप्त्युपायता, तस्या: ज्ञानम् = आत्मयाथार्थ्य प्राप्त्युपायताज्ञानम्, तेन | षष्ठी २।२।८ | षष्ठीतत्पुरुषः (४) |
| २ | देहातिरिक्तात्मज्ञान-निमित्तम (पृ.२८) | देहादतिरिक्तः = देहातिरिक्तः, स चासौ आत्मा = देहातिरिक्तात्मा, तस्य ज्ञानम् = देहातिरिक्तात्म ज्ञानम्, तत् निमित्तं यस्य सः= देहातिरिक्तात्मज्ञाननिमित्तः, तम् | पञ्चमी २।१।३७ (यो.वि.), विशेषणं विशेष्येण० २।१।५७, षष्ठी २।२।८ , अनेकमन्यपदार्थे २।२।२४ | पञ्चमीतत्पुरुषः, कर्मधारयः, षष्ठीतत्पुरुषः, बहुव्रीहिः |
| ३ | देहातिरिक्तात्म-ज्ञानकृतम् (पृ.३०) | देहातिरिक्तात्मज्ञानेन कृतम्= देहातिरिक्तात्मज्ञानकृतम् | तृतीया तत्कृतार्थेन गुणवचनेन २।१।३० | तृतीयातत्पुरुषः |

| | | | | |
|---|---|---|---|---|
| ४ | आत्मयाथात्म्या-वाप्युपायभूतम् (पृ.३०) | आत्मनो याथात्म्यम् = आत्मयाथात्म्यम् , तस्यावाप्तिः= आत्मयाथात्म्यावाप्तिः, तस्या उपायः =आत्मयाथात्म्यावाप्युपायः, सोऽभवद् इति= आत्मयाथात्म्यावाप्युपायभूतः, तस्य नपुंस्त्वे | षष्ठी २।२।८ , सह सुपा २।१।४ | षष्ठीतत्पुरुषः (३), केवलः |
| ५ | जन्माधीनसद्भावः (पृ.३०) | इनं प्रभुम् अधिगतः = अधीनः , जन्मनोऽधीनः = जन्माधीनः, सतो भावः सद्भावः, जन्माधीनः सद्भावो यस्य सः | अत्यादयः कान्ताद्यर्थे द्वितीयया (वा), षष्ठी २।२।८ (२), अनेकमन्यपदार्थे २।२।२४, | प्रादितत्पुरुषः, षष्ठीतत्पुरुषः (२), बहुव्रीहिः |
| ६ | निवृत्ताज्ञान-तत्कार्यतया (पृ.३२) | न ज्ञानम्= अज्ञानम् , तस्य कार्यम् = तत्कार्यम्, अज्ञानञ्च तत्कार्यञ्च= अज्ञानतत्कार्ये , निवृत्ते अज्ञानतत्कार्ये यस्य सः= निवृत्ताज्ञानतत्कार्यः , तस्य भावः निवृत्ताज्ञानतत्कार्यता, तया | नञ् २।२।६, षष्ठी २।२।८ चार्थेद्वन्द्वः २।२।२९, अनेकमन्यपदार्थे २।२।२४, | नञ्तत्पुरुषः षष्ठीतत्पुरुषः, द्वन्द्वः, बहुव्रीहिः |
| ७ | अज्ञानकृतभेद-दर्शनम् (पृ.३२) | अज्ञानेन कृतम् = अज्ञानकृतम्, भेदस्य दर्शनम् = भेददर्शनम्, अज्ञानकृतञ्च तद् भेददर्शनम् | कर्तृकरणे कृता० २।१।३२ षष्ठी २।२।८ विशेषणं विशेष्येण० २।१।५७, | तृतीयातत्पुरुषः , षष्ठीतत्पुरुषः, कर्मधारयः, |
| ८ | तन्मूलोपदेशा-दिव्यवहाराः (पृ.३२) | तत् मूलं येषां ते = तन्मूलाः , उपदेश :आदौ येषां ते= उपदेशादयः , उपदेशादयश्च ते व्यवहारा= : उपदेशादिव्यवहारा :, तन्मूलाश्च ते उपदेशादिव्यवहाराः | अनेकमन्यपदार्थे २।२।२४, विशेषणं विशेष्येण० २।१।५७, | बहुव्रीहिः (२), कर्मधारयः |

| | | | | |
|---|---|---|---|---|
| ९ | जलाहरणादि-प्रवृत्तिहेतुः (पृ.३३) | जलस्याहरणम् = जलाहरणम्, जलाहरणम् आदौ यस्य सः = जलाहरणादिः, तस्य प्रवृत्ति= : जलाहरणादिप्रवृत्तिः, तस्याः हेतुः | षष्ठी २।२।८ , अनेकमन्यपदार्थे २।२।२४,, षष्ठी २।२।८ | षष्ठी तत्पुरुषः, बहुव्रीहिः, षष्ठीतत्पुरुषः (२ ) |
| १० | अद्वितीयात्म-स्वरूपनिश्चये (पृ.३३) | नास्ति द्वितीयो यस्मात् सः= अद्वितीयः, अद्वितीयश्चासौ आत्मा = अद्वितीयात्मा, स्वरूपस्य निश्चय =ःरूपनिश्चयः, अद्वितीयात्मनः स्वरूपनिश्चयः, तस्मिन् | नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः (वा), विशेषणं विशेष्येण० २।१।५७, षष्ठी २।२।८ | नञ्बहुव्रीहिः. कर्मधारयः, षष्ठीतत्पुरुषः (२) |
| ११ | आत्मव्यतिरिक्त-भेदज्ञानकारणस्य (पृ.३४) | आत्मनो व्यतिरिक्तः= आत्मव्यतिरिक्तः, आत्मव्यतिरिक्तश्चासौ भेदः, आत्मव्यतिरिक्तभेदः, तस्य ज्ञानम् = आत्मव्यतिरिक्त भेदज्ञानम्, तस्य कारणम्= आत्मव्यतिरिक्तभेद ज्ञानकारणम्, तस्य | पञ्चमी (यो.वि.), विशेषणं विशेष्येण० २।१।५७,, षष्ठी २।२।८ | पञ्चमीतत्पुरुषः , कर्मधारयः, षष्ठीतत्पुरुषः (२) |

श्रीरामानुजाचार्यकृतगीताभाष्यस्य विश्लेष्यांशे शब्दपञ्चकनिर्मितसमस्तपदानि ११ सङ्ख्यकानि सन्ति। तेषु केवलः १ पदे, अव्ययीभावः १ पदे, तृतीयातत्पुरुषः द्वयोः, पञ्चमीतत्पुरुषः त्रिषु, षष्ठीतत्पुरुषः त्रयोदशसु, प्रयुक्तः। तन्मध्ये कुत्रचिद् वारद्वयम्, वारत्रयम्, वारचतुष्टयमपि स समासः प्रयुक्त इति शब्दपञ्चकनिर्मितसमस्तपदेषु षष्ठीतत्पुरुषः १९ वारं प्रयुक्तो दृश्यते। कर्मधारयतत्पुरुषः १० शब्देषु प्रयुक्तः । प्रादितत्पुरुष १ पदे , नञ्तत्पुरुषः १ पदे सङ्कलनया ३२ स्थानेषु तत्पुरुषः समासः प्रयुक्तो दरीदृश्यते। बहुव्रीहिः षट्सु शब्देषु प्रयुक्तः। द्वन्द्वः १ पदे प्रयुक्तः। इत्थञ्च शब्दपञ्चककनिर्मितसमस्तपदेष्वन्यसमासाऽपेक्षया तत्पुरुषसमासस्याधिकः प्रयोगः कृतो दृश्यते।

सारणी – ४ : शब्दषट्कनिर्मितसमस्तपदानि

| क्र. सं. | समस्तपदानि | विग्रहाः | समासविधायक सूत्राणि | समास-नामानि |
|---|---|---|---|---|
| १ | स्नेहकारुण्यधर्मा-धर्मभयाकुलः (पृ.२५) | धर्मश्चा धर्मश्च = धर्माधर्मौ, तयोर्भयम् = धर्माधर्मभयम्, स्नेहश्च कारुण्यञ्च धममाधर्मभयञ्च= स्नेहकारुण्यधर्माधर्मभयानि, तैराकुलः | चार्थे द्वन्द्वः २। २। २९, षष्ठी २। २। ८, चार्थे द्वन्द्वः २। २।२९, तृतीया तत्कृतार्थेन० २।१।३० | द्वन्द्वः, षष्ठीतत्पुरुषः, द्वन्द्वः, तृतीयातत्पुरुषः |
| २ | स्नेहकारुण्यधर्मा-धर्मधिया (पृ.२८) | स्नेहकारुण्यधर्माधर्मभयम् इतिवत्, भयम् इत्यस्य स्थाने धीरिति | " " | तृतीयातत्पुरुषः |
| ३ | याथात्म्याज्ञान-निमित्तशोकाविष्टम् (पृ.२८) | न ज्ञानम = अज्ञानम , याथात्म्यस्याज्ञानम्= याथात्म्याज्ञानम्, तत् निमित्तं यस्य सः = याथात्म्याज्ञाननिमित्तः, स चासौ शोकः = याथात्म्याज्ञाननिमित्तशोकः, तस्मिन् आविष्टः= याथात्म् याज्ञाननिमित्तशोकाविष्टः, तम् | नञ् २। २। ६, षष्ठी २।२।८ , अनेकमन्यपदार्थे २।२।२४ विशेषणं विशेष्येण०२।१।३२, सप्तमी २।१।४० (यो.वि.) | नञ्तत्पुरुषः, षष्ठीतत्पुरुषः, बहुव्रीहिः , कर्मधारयतत्पुरुषः, सप्तमीतत्पुरुषः |
| ४ | देहात्मस्वभाव-प्रज्ञानिमित्तवादान् (पृ.२९) | देहश्च आत्मा च देहात्मानौ , तयोः स्वभावः= देहात्मस्वभावः, तस्य प्रज्ञा = देहात्मस्वभावप्रज्ञा, सा निमित्तं येषां ते देहात्मस्वभाव प्रज्ञानिमित्ताः, तथा च ते वादाः= देहात्मस्वभाव प्रज्ञानिमित्तवादाः तान् | चार्थे द्वन्द्वः २।२।२९, षष्ठी २।२।८ (२), अनेकमन्यपदार्थे २।२।२४ विशेषणं विशेष्येण०२।१।३२, | द्वन्द्वः, षष्ठीतत्पुरुषः (२), बहुव्रीहिः, कर्मधारयः |

| | | | | |
|---|---|---|---|---|
| ५ | अज्ञानकृतभेद-दृष्टिवादे (पृ.३२) | न ज्ञानम् = अज्ञानम् अज्ञानेन कृता = अज्ञानकृता, भेदस्य दृष्टि = :भेददृष्टिः, अज्ञानकृता चेयं भेददृष्टि= : अज्ञानकृतभेददृष्टिः, तां वदतीति= अज्ञानकृतभेददृष्टिवादः, तस्मिन् | नञ् २।२।६, कर्तृकरणे कृता० २।१।३२ षष्ठी २।२।८, विशेषणं विशेष्येण०२।१।३२, उपपदमतिङ् २।२।१९ | नञ्तत्पुरुषः, तृतीयातत्पुरुष, षष्ठीतत्पुरुषः, कर्मधारयतत्पुरुषः, उपपदतत्पुरुषः |

श्रीरामानुजाचार्यकृतगीताभाष्यस्य विश्लेष्यांशे शब्दषट्कनिर्मितसमस्तपदानि पञ्च सन्ति । तत्र तृतीयातत्पुरुषः २ पदयोः, षष्ठीतत्पुरुषः ४ शब्देषु, तेष्वेकत्र वारद्वयं प्रयुक्त इति ५ वारं तस्य प्रयोगो जातः । सप्तमीतत्पुरुष एकस्मिन्, कर्मधारयतत्पुरुषः२ पदयोः, उपपदतत्पुरुष एकस्मिन्, नञ्तत्पुरुषः द्वयोः प्रयुक्त इति शब्दषट्कनिर्मितसमस्तपदेषु १५ वारं तत्पुरुषः समासः प्रयुक्तो दरीदृश्यते। बहुव्रीहिः पदद्वये, द्वन्द्वः पदद्वये वारत्रयं प्रयुक्तः। इत्थञ्च शब्द-षट्कनिर्मितसमस्तपदेषु तत्पुरुषसमासस्याधिकः प्रयोगः कृतो दृश्यते।

सारणी - ५ : शब्दसप्तकनिर्मितसमस्तपदम्

| क्र. सं. | समस्तपदानि | विग्रहाः | समासविधायक सूत्राणि | समास-नामानि |
|---|---|---|---|---|
| १ | भेददर्शनतत्कार्यो-पदेशाद्यसम्भवः (पृ.३५) | भेदस्य दर्शनम् = भेददर्शनम् , तस्य कार्यम् = तत्कार्यम्, भेददर्शनञ्च तत्कार्यञ्च, भेददर्शनतत्कार्ये, उपदेश आदौ यस्य स उपदेशादिः, भेददर्शनतत्कार्ययोरुपदेशादिः= भेददर्शनतत्कार्योपदेशादिः , न सम्भवः = असम्भवः, भेददर्शनतत्कार्योपदेशा देरसम्भवः | षष्ठी २।२।८ चार्थे द्वन्द्वः २।२।२९, अनेकमन्यपदार्थे २।२।२४, षष्ठी २।२।८, नञ् २।२।६, षष्ठी २।२।८ | षष्ठीतत्पुरुषः, द्वन्द्वः, बहुव्रीहिः षष्ठीतत्पुरुषः, नञ्तत्पुरुषः, षष्ठीतत्पुरुषः |

श्रीरामानुजाचार्यकृतगीताभाष्यस्य विश्लेष्यांशे शब्दसप्तकनिर्मितसमस्तपदमेकमेव दृश्यते । तत्र च षष्ठीतत्पुरुषो वारत्रयं, नञ्तत्पुरुषश्चैकवारमिति कृत्वा वारचतुष्टयं तत्पुरुषसमासस्य, बहुव्रीहिद्वन्द्वयोश्चैकैकवारं प्रयोगः कृतो दृष्टः। अत्र तत्पुरुषसमासस्याधिकः प्रयोगः प्राप्तः।

सारणी – ६ : दशशब्दनिर्मितसमस्तपदम्

| क्र. सं. | समस्तपदानि | विग्रहाः | | समास-नामानि |
|---|---|---|---|---|
| १ | निर्विशेषकूट<br>स्थनित्य<br>चैतन्यात्मया<br>थात्म्य<br>साक्षात्कारात्<br>(पृ.३२) | निर्गतो विशेषः सजातीयविजातीय<br>स्वगतभेदो<br>यस्मात्सः= निर्विशेषः,<br>चैतन्यश्चासौ आत्मा =चैतन्यात्मा,<br>नित्यश्चासौ चैतन्यात्मा=<br>नित्यचैतन्यात्मा,<br>कूटवत् (निर्विकाररूपेणाऽऽधार<br>रूपेण च)<br>तिष्ठतीति कूटस्थः,<br>कूटस्थश्चासौ नित्यचैतन्यात्मा=<br>कूटस्थनित्यचैतन्यात्मा,<br>निर्विशेषश्चासौ कूटस्थनित्यचैतन्यात्मा=<br>निर्विशेषकूटस्थनित्यचैतन्यात्मा ,<br>तस्य याथात्म्यम्= निर्विशेषकूटस्थ<br>नित्यचैतन्यात्मयाथात्म्यम्, साक्षात्<br>क्रियते इति= साक्षात्कार :,<br>निर्विशेषकूटस्थनित्य<br>चैतन्यात्मयाथात्म्यस्य साक्षात्कारः =<br>निर्विशेषकूटस्थनित्य<br>चैतन्यात्मया<br>थात्म्यसाक्षात्कारः,<br>तस्मात् | प्रादिभ्यो धातुजस्य०<br>(वा), विशेषणं<br>विशेष्येण०२।१।५७<br><br>उपपदमतिङ् २।२।१९,<br><br>विशेषणं<br>विशेष्येण०२।१।५७<br><br>षष्ठी २।२।८,<br>(साक्षात्प्रभृतीनि च<br>१।४।७४ इति<br>गतिसंज्ञायां)<br>कुगतिप्रादयः २।२।१८,<br>षष्ठी २।२।८ | बहुव्रीहिः,<br>कर्मधारय-<br>तत्पुरुषः<br>(२),<br>उपपद-<br>तत्पुरुषः,<br>कर्मधारय-<br>तत्पुरुषः<br>(२),<br>षष्ठी-<br>तत्पुरुषः,<br>गति-<br>तत्पुरुषः,<br>षष्ठी-<br>तत्पुरुषः |

श्रीरामानुजाचार्यकृतगीताभाष्यस्य विश्लेष्यांशे दशशब्दनिर्मितमेकं समस्तपदमस्ति। तत्र च षष्ठीतत्पुरुषो वारद्वयं, कर्मधारयतत्पुरुषो वारचतुष्टयम्, गतितत्पुरुष उपपदतत्पुरुषश्चैकैकवारमिति कृत्वाऽष्टवारं तत्पुरुषः प्रयुक्तो दृष्टः, बहुव्रीहिश्चैकवारम्। अत्र तत्पुरुषसमासस्याधिकः प्रयोगः प्राप्तः।

सारणी - ७ : त्रयोदशशब्दनिर्मितसमस्तपदम्

| क्र. सं. | समस्तपदानि | विग्रहाः | समासविधायक सूत्राणि | समास-नामानि |
|---|---|---|---|---|
| १ | आत्मपरमात्मया<br>थात्म्यतत्प्राप्त्युपाय<br>भूतकर्मयोगज्ञान<br>योगभक्तियोग<br>गोचरम् (पृ.२८) | आत्मा च परमात्मा च=<br>आत्मपरमात्मानौ,<br>तयोः याथात्म्यम् =<br>आत्मपरमात्मयाथात्म्यम्,<br>तस्य प्राप्तिः = तत्प्राप्तिः,<br>तस्योपायः = तत्प्राप्त्युपायः,<br>तत्प्राप्त्युपायोऽभवद् इति=<br>तत्प्राप्त्युपायभूतः,<br>युज्यते ब्रह्मणा अनेन इति योगः,<br>कर्म एव योगः = कर्मयोगः<br>एवमेव -ज्ञानमेव योगः = ज्ञानयोगः,<br>भक्तिरेव योगः = भक्तियोगः,<br>कर्मयोगश्च ज्ञानयोगश्च भक्तियोगश्च=<br>कर्मयोगज्ञानयोगभक्तियोगाः ,<br>तत्प्राप्त्युपायभूताश्च ते<br>कर्मयोगज्ञानयोगभक्तियोगाः =<br>तत्प्राप्त्युपाय<br>भूतकर्मयोगज्ञानयोगभक्तियोगाः,<br>आत्मपरमात्मयाथात्म्यञ्च<br>तत्प्राप्त्युपाय<br>भूतकर्मयोगज्ञानयोगभक्तियोगाश्च=<br>आत्मपरमात्मयाथात्म्यतत्प्राप्त्युपाय<br>भूतकर्मयोगज्ञानयोग<br>भक्तियोगाः,<br>ते गोचरा यस्मिन् तत् =<br>आत्मपरमात्मया<br>थात्म्यतत्प्राप्त्युपाय<br>भूतकर्मयोगज्ञानयोग<br>भक्तियोगगोचरम् | चार्थे द्वन्द्वः २।२।२९<br>षष्ठी २।२।८<br>सह सुपा २।१।४<br>मयूरव्यंसकादयश्च १।२।७२ (३)<br>चार्थे द्वन्द्वः २।२।२९<br>विशेषणं विशेष्येण० २।१।५७<br>चार्थे द्वन्द्वः २।२।२९<br>अनेकमन्यपदार्थे २।२।२४ | द्वन्द्वः<br>षष्ठीतत्पुरुषः (३)<br>केवलः कर्मधारयः<br>द्वन्द्वः<br>कर्मधारयः<br>द्वन्द्वः<br>बहुव्रीहिः |

श्रीरामानुजाचार्यकृतगीताभाष्यस्य विश्लेष्यांशे त्रयोदशशब्दनिर्मितमेकं पदमस्ति । तत्र च षष्ठीतत्पुरुषो वारत्रयम्, कर्मधारयतत्पुरुषो वारद्वयम् इति कृत्वा तत्पुरुष समासो वारपञ्चकम्, केवलसमासो वारमेकम्, बहुव्रीहिसमास एकवारम्, द्वन्द्वसमासश्च वारत्रयं प्रयुक्तः । अत्रापि तत्पुरुषसमासस्याधिकः प्रयोगः प्राप्तः ।

**निष्कर्षः**

व्याकरणशास्त्रप्रचलितासु शब्दव्युत्पत्तिप्रक्रियासु समासप्रक्रियाप्येका, यया च लम्बायमाना जटिलशब्दा अपि निर्मीयन्ते । समासो हि संस्कृतभाषाया वैशिष्ट्यरूपोऽस्ति । अल्पशब्दैरपि गहनतमभावप्रकाशनाय हि समासः क्रियते । व्याकरणशास्त्रनिपुणा विद्वांसः समासबहुलां भाषां प्रयुञ्जते । श्रीरामानुजाचार्यविरचितगीताभाष्ये तादृशी भाषा प्राप्यते । श्रीमद्भगवद्गीता हि पाण्डुतनययुद्धप्रोत्साहनव्याजेन भगवता वासुदेवेन प्रदत्ता वेदान्तोदिता ज्ञानकर्माङ्गकभक्तियोगमूलिका दिव्यज्ञानधारास्ति । तस्याश्च वेदोपनिषत्सम्मतं वास्तविकमर्थं प्रकाशयितुं श्रीरामानुजाचार्येणगीताभाष्यंप्रणीतम्।गीताभाष्येचतेनसमासबहुलाभाषाप्रयुक्ता।अतःसमासप्रक्रियाज्ञानानन्तरमेव तदीयभाष्यपंक्तिस्फोरणे सारल्यमागच्छति । अत एवास्मिँन्लेखे श्रीरामानुजविरचित-गीताभाष्यद्वितीयाध्यायस्य १–१२श्लोकपर्यन्तभाष्यप्रयुक्तानां समस्तपदानां शब्दसंख्यादृष्ट्या समासनामदृष्ट्या च वर्गीकरणं, विश्लेषणं, पाणिनीयव्याकरणसम्मतरीत्या विग्रहप्रदर्शनञ्च कृतम् । अनेन चानुसन्धानेनेदं तथ्यं प्राप्तम् -

श्रीरामानुजाचार्यविरचिते गीताभाष्ये समासबहुला भाषा प्रयुक्तास्ति । द्वितीयाध्याय एव सप्तशतकल्पानि (६८५) समस्तपदानि प्रयुक्तानि प्राप्यन्ते । अस्मिंश्च शोधलेखे १-१२ श्लोकपर्यन्तभागभाष्यस्थानां समस्तपदानामेव वर्गीकरणं विश्लेषणञ्च विहितम् । तत्र च शब्दद्वयनिर्मितसमस्तपदसंख्या ५८, शब्दत्रयनिर्मितसमस्तपदसंख्या २९, शब्दचतुष्टयनिर्मितसमस्तपदसंख्या१९,शब्दपञ्चक-निर्मितसमस्त-पदसंख्या११,शब्दषट्कनिर्मितसमस्तपदसंख्या ५, शब्दसप्तकनिर्मितसमस्तपदसंख्या १, दशशब्दनिर्मितसमस्तपदसंख्या १, त्रयोदशशब्दनिर्मितसमस्तपदसंख्या १ इति कृत्वा १-१२ श्लोकपर्यन्तभागे १२५ संख्यकानि समस्तपदानि प्रयुक्तानि दृश्यन्ते ।

शब्दद्वयनिर्मितसमस्तपदानां विश्लेषणमत्र न कृतम् । शब्दत्रयनिर्मितसमस्तपदेषु २६ वारं तत्पुरुषसमासः, ८ पदेषु बहुव्रीहिसमासः, ७ पदेषु द्वन्द्वसमासः प्रयुक्तः । शब्दचतुष्टयनिर्मितसमस्तपदेषु मध्ये १ पदे केवलः, १ पदेऽव्ययीभावः, ३१ स्थानेषु तत्पुरुषसमासः, ८ पदेषु बहुव्रीहिः, ३ पदेषु द्वन्द्वसमासः प्रयुक्तः । शब्दपञ्चकनिर्मितसमस्तपदेषु केवलः १ पदे, अव्ययीभावः १ पदे, तत्पुरुषः ३२ स्थानेषु , बहुव्रीहिः ६ शब्देषु, द्वन्द्वः १ पदे प्रयुक्तः । शब्दषट्कनिर्मितसमस्तपदेषु १५ वारं तत्पुरुषः, पदद्वये बहुव्रीहिः, वारत्रयं द्वन्द्वः प्रयुक्तः । शब्दसप्तकनिर्मितसमस्तपदे वारचतुष्टयं तत्पुरुषस्य, बहुव्रीहिद्वन्द्वयोश्चैकैकवारं प्रयोगः कृतो दृष्टः । दशशब्दनिर्मितसमस्तपदे चाऽष्टवारं तत्पुरुषः प्रयुक्तः, बहुव्रीहिश्चैकवारम् । त्रयोदशशब्दनिर्मितपदे तत्पुरुषसमासो वारपञ्चकम्, केवलसमासो वारमेकम्, बहुव्रीहिसमास एकवारम्, द्वन्द्वसमासश्च वारत्रयं प्रयुक्तः ।

अनेन चाध्ययनेन १-१२ श्लोकपर्यन्तभागस्थेषु १२५ संख्यकेषु समस्तपदेषु शब्दद्वयनिर्मितानि ५८

संख्यकानि समस्तपदानि विहायापि द्व्यधिकपदनिर्मितेषु ६७ समस्तपदेषु मध्ये तत्पुरुषसमासः १२१ वारम्, बहुव्रीहिसमासः २७ वारम्, द्वन्द्वसमासः १८ वारम्, केवलसमासः ३ वारम्, अव्ययीभावसमासः २ वारं प्रयुक्तः प्राप्तः । इत्थञ्च गीताभाष्यस्य समीक्ष्यखण्डे सर्वत्र तत्पुरुषसमासस्यैवाधिकः प्रयोगः प्राप्यते । अन्त्ये च—लेखस्यास्य सहयोगेन पाठकाः रामानुजीयगीताभाष्यद्वितीयाध्यायायस्य १-१२ श्लोकभागाध्ययने सारल्यमनुभविष्यन्ति, शेषभागाध्ययनेऽपि समासप्रक्रियाभ्यासजन्यः कश्चित्सहयोगो भविष्यतीत्याशासे ।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च कृतज्ञतां व्यनज्मि ।

## सन्दर्भसामग्रीसूची

आचार्यः, वरदराजः (२०४७), मध्यसिद्धान्तकौमुदी , सुधा इन्दुमती टीकाद्वयोपेता (पुनर्मुद्रितसंस्करणम्) वाराणसी : चौखम्बा अमरभारती प्रकाशन ।

गोयन्का, हरिकृष्णदास (व्या) (२०५०) , श्रीमद्भगवद्गीता, श्रीरामानुजभाष्य हिन्दी अनुवादसहित, गोरखपुर :गीताप्रेस ।

दीक्षितः, भट्टोजिः (ख्रै. २००८), वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्) वाराणसी : चौखम्बा विद्याभवन ।

दूबे, वन्दना (ख्रै .२००२), श्रीमद्भगवद्गीता पर शङ्कर और रामानुज के भाष्यों का तुलनात्मक अध्ययन ( अप्रकाशितविद्यावरिधिशोधप्रबन्धः), महात्मा–गाँधी–काशी–विद्यापीठम्, संस्कृतविभागः ।

नेपाल, रघुनाथ र अन्य (२०७४), श्रीरामानुजाचार्य एवम् विशिष्टाद्वैत दर्शन, बत्तीसपुतली काठमाडौँ : श्रीवैष्णव परिषद् नेपाल ।

पतञ्जलिः, व्याकरणमहाभाष्यम्, द्वितीयो भागः, गुरुकुल झज्जर (रोहतकः) : हरयाणा साहित्य संस्थान, वै. २०२० ।

पाणिनिः (२०४७), पाणिनीयसूत्रपाठः (अष्टाध्यायी), हरिवंशकुमारपाण्डेयः (सम्पा.), वाराणसी : भारतीय विद्या संस्थान ।

पाण्डेय, मनीषा ख्रै .२००४–५), आचार्य रामानुजकी भक्ति अवधारणा (अप्रकाशित–विद्यावरिधिशोधप्रबन्धः), जौनपुरम् : वीर–बहादुर–सिंह–पूर्वांचल–विश्वविद्यालयः, शोधकेन्द्रम्, दर्शनशास्त्रविभागः ।

पौडेलः, हरिलालः (२०७४), संस्कृतरचनाप्रकाशोद्धृतपञ्चतन्त्रामुखस्थसमस्तशब्दाध्ययनम्, मेधा अङ्क १, बेलझुण्डी दाङ : ने.सं.वि .प्राध्यापक संघ विश्वविद्यालय विद्यापीठ एकाइ समिति ।

पौडेलः, हरिलालः (२०७८) श्रीरामानुजीयगीताभाष्यप्रथमाध्यायस्थकतिपयजटिलसमस्तशब्दानामध्ययनम्, शोध वर्षः ९, अङ्कः १, काठमाडौँ :ने.सं.वि. प्राध्यापक–संघः केन्द्रीयसमितिः ।

भट्टः, कौण्डः (१९९९), वैयाकरणभूषणसारः, दर्पण-सुबोधिनीसहितः, वाराणसी : चौखम्बा सुरभारती प्रकाशन ।

वेदान्तदेशिकः (२०३३), (व्या) श्रीमद्भगवद्गीता, रामानुजभाष्येण तात्पर्यचन्द्रिकया च सहिता, वृन्दावन : श्रीरङ्गनाथ प्रेस ।

श्रीमद्भगवद्गीता ( २०५४) , गोरखपुर : गीताप्रेस ।